# ॥ ગાયત્રીતત્ત્વસ્તોત્રમ્ ॥

.. gAyatrItattvastotram ..

sanskritdocuments.org

August 20, 2017

# .. gAyatrItattvastotram ..

## ॥ ગાયત્રીતત્ત્વસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : gAyatrItattvastotram

File name : gAyatrItattvastotram.itx

Category : devii, gAyatrI

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : NA

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : February 4, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ ગાયત્રીતત્ત્વસ્તોત્રમ્ ॥

શ્રીગણેશાય નમઃ ॥

શ્રીગાયત્રીતત્ત્વમાલામન્ત્રસ્ય વિશ્વામિત્ર ઋષિઃ, અનુષ્ટુપ્છદઃ,
પરમાત્મા દેવતા, હલો બીજાનિ, સ્વરાઃ શક્તયઃ, અવ્યક્તં કીલકમ્,
મમ સમસ્તપાપક્ષયાર્થે ગાયત્રીતત્ત્વપાઠે વિનિયોગઃ ।
ચતુર્વિંશતિતત્ત્વાનાં યદેકં તત્ત્વમુત્તમમ્ ।
અનુપાધિ પરમ્બ્રહ્મ તત્પરઞ્જ્યોતિરોમિતિ ॥ ૧॥

યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય તત્પરઞ્જ્યોતિરોમિતિ ॥ ૨॥

તત્સદાદિપદૈર્વાચ્યં પરમં પદમવ્યયમ્ ।
અભેદત્વં પદાર્થસ્ય તત્પરઞ્જ્યોતિરોમિતિ ॥ ૩॥

યસ્ય માયાંશભાગેન જગદુત્પદ્યતેઽખિલમ્ ।
તસ્ય સર્વોત્તમં રૂપમરૂપસ્યાભિધીમહિ ॥ ૪॥

ન પશ્યન્તિ પરમં પશ્યન્તો હિ દિવૌકસઃ ।
તં ભૂતાનિલદેવં તુ સુપર્ણમુપધાવતામ્ ॥ ૫॥

યદંશઃ પ્રેરિતો જન્તુઃ કર્મપાશનિયન્ત્રિતઃ ।
આજન્મકૃતપાપાનામપહન્તું દિવૌકસઃ ॥ ૬॥

ઇદં મહામુનિપ્રોક્તં ગાયત્રીતત્ત્વમુત્તમમ્ ।
યઃ પઠેત્પરયા ભક્ત્યા સ યાતિ ષરમાં ગતિમ્ ॥ ૭॥

સર્વવેદપુરાણેષુ સાઙ્ગોપાઙ્ગેષુ યત્ફલમ્ ।
સકૃદસ્ય જપાદેવ તત્ફલં પ્રાપ્નુયાન્નરઃ ॥ ૮॥

અભક્ષ્યભક્ષણાત્પૂતો ભવતિ ।
અગમ્યાગમનાત્પૂતો ભવતિ । સર્વપાપેભ્યઃ પૂતો ભવતિ ।
પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ ।
સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
મધ્યન્દિનમુપયુઞ્જાનોઽસત્પ્રતિગ્રહાદિના મુક્તો ભવતિ ॥ ૯॥

અનુપ્લવં પુરુષાઃ પુરુષમભિવદન્તિ યં યં કામમભિધ્યાયતિ

તં તમેવાપ્નોતી પુત્રપૌત્રાન્ કીર્તિસૌભાગ્યાનિ ચોપલભતે ।
સર્વભૂતાત્મમિત્રં દેહાન્તે તદ્વિશિષ્ટો ગાયત્રીપરમં પદમાપ્નોતિ ॥ ૧૦॥

ઇતિ શ્રીવેદસારે ગાયત્રીતત્ત્વસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. gAyatrItattvastotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*